शिराः स्नायवोयाभ्यान्तौ दृढ़प्रहारौ नाड़ीपर्य्यन्तमपि वेदनावन्तावित्यर्थः। उरोहस्तं उरसि चपेटाप्रहारम्। पूर्णकुम्भौ द्वित्वं परस्परं द्वावपि चक्रतुरिति वक्तुम्। तलेन चपेटया। आहत्य जत्रुदेशे पृष्ठं कृत्वा बाहुभिः बद्धत्वाद्द्वावपि मिथः उदरम् आदाय प्रचक्रतुः प्रचिच्चिपतुः कृ विक्षेपेऽस्य छान्दसं रूपम्। एवं कक्षां सुपार्श्वं च प्रचक्रतुः। तत्रवन्तौ तत्रस्तनूकरणं गात्रसङ्कोच इत्यर्थः तद्वन्तौ। अधोहस्तं उदरस्याधस्तात् हस्तं कृत्वा हस्ताभ्यामुदरमावेष्ट्य स्वकण्ठे स्वोरसि च कण्ठोरःसमीपे अनीय आक्षिपत् आस्फालितवान्। पृष्ठस्य भूसम्बन्धेन जातं भङ्गं पराभवं बाहुभ्यां उदरादिनिपीड़ने सम्पूर्णमूर्द्धा तृणपीड़ं पूर्णयोगं योगोविम्नव्यघातनं तच्च पूर्णम्। अन्यत्र मुष्टेः पातं प्रदर्श्य अन्यत्र पातनमित्यर्थः एवमादिनियुद्धानि पादाकर्षणशीर्षकक्षीकरणादीनि"

**उ(ऊ)र्ज** जीवने वा चु० उभ० अक० पक्षे भ्वा० पर० सेट्। उ(ऊ)र्ज्जयति ते उ(ऊ)र्ज्जति। और्ज्जिजत्-त और्ज्जीत्। उ(ऊ)र्ज्जयाम् बभूव आस चकार चक्रे पक्षे उ(ऊ)र्जाम् बभूव आस चकार। क्त उ(ऊ)र्ज्जित,वृद्धे बलान्विते। णिजन्तत्वे वर्द्धिते त्रि० दीर्घादिरयमिति बहवः

**उ(ऊ)र्णनाभ** पु० ऊर्णेव सूत्रं नाभौ गर्भेऽस्य अच् समा० ह्रस्वः। लूतायाम् (माकडसा) दीर्घादिरयमिति केचित्।

**उ(ऊ)र्णा** स्त्री ऊर्णूयते आच्छाद्यते ऊर्णु-ड ह्रस्वः। १मेषादिलोम्नि २ललाटस्थलोमसमूहात्मके चिह्नभेदे। "ललाटपट्टे नवनलिननालभङ्गतन्वीयमूर्णा परिस्फुरति" काद०। दीर्घादिरयमिति बहवः

**उ(ऊ)र्द** दाने स्वादे सक० क्रीड़ायाम् अक० भ्वा० आत्म० सेट्। उ(ऊ)र्दते और्दिदिष्ट दीर्घादिरयमिति बहवः।

**उ(ऊ)द्र** पु० उर्द-रक्। जलविड़ाले (उद्बिराल) दीर्घादिरयमिति बहवः।

**उ(ऊ)र्व** हिंसायां भ्वा० पर० सक० सेट्। उ(ऊ)र्वति और्वीत्। क्विपि वलोपे ऊः उरौ दीर्घादित्वे ऊरौ इति भेदः।

**उर्व्व** पु० उर्वी पृथिवी सञ्चारस्थानत्वेनास्त्यस्य अर्श० अच्। १पृथिवीसञ्चारिणि पितृभेदे ताण्ड्य० ब्रा० दृश्यः। २ऋषिभेदे ततः विदा० अञ्। और्व तदपत्ये पुंस्त्री।

**उर्वट** पु० उरु यथा तथाऽटति अट+अच् इत०। वत्सतिका०। तस्य दीर्घोल्लम्फादिना अटनात् तथात्वम्।

**उर्वरा** स्त्री उरु शस्यादिकमृच्छति ऋ-अच् इत०। १सर्वशस्याढ्यभूमौ "पततां गणैः पिबतु सार्द्रमुर्वरा" माघः २भूमिमात्रे विश्वः ३अधिके त्रि० उर्वरमधिकं जातमस्य तारका० इतच्। उर्वरित आधिक्ययुक्ते (उपचान) अधिके। उरून् महत ऋच्छति ऋ-अच् इत०। अप्सरोभेदे "कलानिधिर्गुणनिधिकर्पूरतिलकोर्व्वरा" काशीख०।

**उर्वरासा** त्रि० उर्वरां भूमिं सनोति सन-विट् ङा। भूमिविभाजके पुत्रादौ "क्षेत्रासां ददथुरुर्वरासाम्" ऋ० ४, २८,१, उर्वरासां पुत्रम्" भा०। २उर्व्वराविभाजके त्रि० "त्वं नः सहस्रभरमुर्वरासाम्" ६,२०,१। "उर्वराणां भूमीनां सनितारं संभक्तारम्" भा०।

**उर्वरी** स्त्री ऋ-गतौ वनिप् ङीप् वनोरश्च। आधिक्यप्राप्तायां स्त्रियाम् "ओषधीनामहं वृण उर्वरीरिव साधुया" अथ० १०,४,२, अन्यलिङ्गे उर्वन् इत्येव

**उर्वर्य** त्रि० उर्वरायां भवः यत्। १सर्वशस्याढ्यभूमिभवे रुद्रभेदे "नम उर्वर्याय खल्याय" यजु० १६,३३,रुद्राध्यायः।

**उर्वशी** स्त्री उरून् अश्नुते वशीकरोति उरु+अश-क गौरा० ङीष्। स्वर्गवेश्याभेदे। अप्सरोभेदाश्च अप्सरः शब्दे उक्ताः इयञ्च नारायणोरुं भित्त्वा जाता यथोक्तं हरिवं० ८५ अ० "नारायणोरुं निर्भिद्य सम्भूता वरवर्णिनी। ऐलस्य दयिता देवी योषिद्रत्नं किमुर्वशी" ततश्च ऊरुं नारायणोरुं कारणत्वेनाश्नुते प्राप्नोति अश-क ङीष् पृ० ह्रस्वः। इति विग्रहः। इयमेव पुरूरवसःपत्नी आसीत्। "पुत्रोबुधस्योत्तमवीर्यकर्मा पुरूरवा यस्य सुतो सुदेवः। तथैव पश्चाच्चकमे महात्मा पुरोर्वशीमप्सरसां वरिष्ठाम्" १५४ अ० "पुरूरवाः सुतोविद्वानिलायां समपद्यत" इत्युपक्रम्य "षट् सुता जज्ञिरे चैलादायुर्धीमानमावसुः। दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुताः" भा० आ० ७५ अ०। सा च इन्द्रलोकगतार्ज्जुनस्य समीपे रिरंसया गत्वा तेन प्रत्याख्याता तस्मै शापं ददाविति कथा भा० व० ४६ अ० "तव पित्राभ्यनुज्ञातां स्वयञ्च गृहमागताम्। यस्मान्मां नाभिनन्देथाः कामबाणवशं गताम्। तस्मात्त्वं नर्त्तनः पार्थ! स्त्रीमध्ये मानवर्जितः। अपुमानिति विख्यातः षण्ढवद्विचरिष्यसि" २नदीभेदे उर्वशीतीर्थशब्दे उदा०।

**उर्वशीतीर्थ** न० भारतोक्ते तीर्थभेदे। "उर्व्वशीतीर्थमासाद्य ततः सोमाश्रमं बुधः" भा० व० ८४। तच्च नदीरूपम्। "उर्वशीं कृत्तिकायोगे गत्वा चैव समाहितः लौहित्ये विधिवत् स्नात्वा पुण्डरीकफलं लभेत्" भा० अनु० २५ अ०।

**उर्वशीरमण** पु० उर्वशीं रमयति रम-ल्यु इत०। चन्द्रवंश्ये